Shodhshauryam, International Scientific Refereed Research Journal
© 2021 SHISRRJ | Volume 4 | Issue 1 | ISSN : 2581- 6306

# वायुपुराणम्, पद्मपुराणम् गोतत्त्वविमर्शः



डॉ. नानूराम जाटः
रा. उ. प्रा. सं. विद्यालय माताजी भोपावास चौमूँ ,भारत।

**Article Info**
Volume 4, Issue 1
Page Number : 174-205

**Publication Issue :**
January-February-2021

**Article History**
Accepted : 16 Jan 2021
Published : 30 Jan 2021

**सारांशः**– पद्मपुराणस्य सूक्ष्मेनिकया दिग्दर्शनमकारि। तत्र तत्र सन्दर्भाणां यः क्रमः प्राप्तः तेनैव क्रमेण प्रबन्धेऽस्मिन् विनियोजितः अग्रेऽपि क्वचित् श्राद्धदानविमर्शप्रकरणे गोदानस्य महत्त्वं प्रत्यपादि। किं बहुना पद्मपुराणे भारतीयसंस्कृतेः प्रायेण सर्वे पक्षाः याथातथ्येन वर्णिताः। यथा एकादशीव्रतप्रसंगे द्वादशमासानां एकादशीव्रतं विस्तरेण कथितम्। तत्रैव गोदानस्य च क्वचित् संक्षेपेण - चर्चा प्राप्यते। पुराणमिदं पठनपाठनयोग्यं प्रतिभाति यत्र सर्वे समाजोपकारिणो विपयाः निर्दिष्यः। इदानीं पुराणं प्रणम्य आदिकाव्यस्य अन्वेषणं करोमि।

**मुख्यशब्दः**–वायुपुराणम्, पद्मपुराणम्, गोतत्त्वविमर्शः, वेदः,धर्मः, विद्वांसः।

---

पुराणं प्राचीनतमं साहित्यं वर्तते। बहुत्र पुराणं पञ्चमो वेदः 'इत्युक्तिः' श्रूयते। अयं भावः वेदस्य यादृशी प्रतिष्ठा विद्यते तथैव पुराणस्य भवति। पुराणेषु वैदिकविषयाणामवगाहनं विस्तरेण कृतं वर्तते तत्रापि पुराणस्य विशिष्टैका शैली भवति रूपकमाध्यमेन क्लिष्टविषयस्य लोकानामुपकाराय निरूपणम्। अयमत्र विशेषः अनेके विद्वांसः पुराणस्य वेदत्वमपि अंगीकृतवन्तः। किं बहुना छान्दोग्योपनिषदि नारदस्य वचनं यथा -

"ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदम्।
अथर्वाणां चतुर्थमितिहासपुराणं पञ्चमं वेदानां वेदम्।।"[1]

श्रीमद्भागवते च स्पष्टशब्देन उक्तम् -

"इतिहासः पुराणं च पञ्चमो वेद उच्यते"[2]

पुराणादौ धर्मस्य समग्रं चिन्तनं प्राप्यते। सर्वाणि पुराणानि धर्मस्य समग्रं चिन्तनं प्राप्यते। पुराणानां विशिष्टमध्ययनं सामाजिकानां विशिष्य गवेषकाणां कृते रहस्योद्घाटनाय प्रतीयते। बृहद्धर्मोपपुराणस्यायं श्लोकः -

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

रामायणं पुराणानि महाभारतमेव च।

मन्वादि धर्मशास्त्राणि धर्मार्थानि सदैव हि॥[3]

नारदपुराणे च -

वेदार्थादधिकं मन्ये पुराणार्थं वरानने।

वेदा: प्रतिष्ठिता: सर्वे पुराणे नात्र संशयः॥[4]

स्कन्दपुराणे -

वेदा: प्रतिष्ठिता पूर्वं पुराणे नात्र संशयः।

आत्मा पुराणं वेदानां पृथगङ्गानि तानि षट्॥

यन्न दृष्टं हि वेदेषु तद् दृष्टं स्मृतिभि: किल।

उभाभ्यां यन्न दृष्टं हि तत्पुराणेषु गीयते॥[5]

वेदानधीत्य च केचन ज्ञानिनो भवन्ति परन्तु पुराणानाकल्मनं विना सम्यक् ज्ञानं न प्रसरति। तत्रापि विचक्षणाय पुराणानां साकल्येनाध्ययनं विधेयम्। वायुपुराणस्य निम्नलिखित: श्लोक: प्रमाणभूतो भवति -

यो विद्याच्चतुरो वेदान् साङ्गोपनिषदो द्विजः।

न चेत् पुराणं संविद्यान्नैव स स्याद् विचक्षणः॥[6]

किञ्चित् परिवर्तनेन उपर्युक्तो भाव: पद्मपुराणे प्रस्तावित:। पद्मपुराणस्य सृष्टि खण्डे अयं प्रस्ताव: प्राप्यते -

पुराणं सर्वशास्त्राणां प्रथमं ब्रह्मणा स्मृतम्।

उत्तमं सर्वलोकानां सर्वज्ञानोपपादकम्॥[7]

प्रामुख्येन पुराणानां संख्या अष्टादश विद्यते। एतेषां पुराणानां कर्ता सत्यवती सुत: व्यास: अस्ति। मत्स्य पुराणस्यायं श्लोक: अत्र प्रसंगे प्रमाणमस्ति –

अष्टादश पुराणानि कृत्वा सत्यवती सुतः।

पश्चात् भारतमाख्यानं चक्रे तदुपबृंहितम्॥[8]

अयं भाव: पाराशरोव्यास: अष्टादशपुराणानि कृत्वा महाभारताख्यानं रचयामास। देवीभागवते चायं श्लोक: किञ्चित् परिवर्तनेन पठित: तद्यथा -

अष्टादश पुराणानि कृत्वा सत्यवतीसुतः।

भारताख्यानमतुलं चक्रे तदुपबृंहितम्॥[9]

अन्यत्रापि च प्रमाणम् -

अष्टादश पुराणानि कृष्णेन मुनिनानद्य।

कथितानि सुदिव्यानि पठितानि त्वयानहा।।[3]

तथा च -

अष्टादशपुराणानां वक्तासत्यवतीसुतः।। [10]

पुराणेषु बहुत्र वेदतुल्यं पुराणमिति वचनं प्राप्यते। वेदतुल्यमित्युक्ते वेदस्य प्राथम्यं तत्र अङ्गीकर्तव्यम्। अनन्तरं पुराणमागतम् यतोहि - "पुराणं ब्रह्मसम्मितम्"[11]

अयमर्थ: वेदतुल्यं पुराणमिति।

उपमानं प्रसिद्धं श्रेष्ठं च भवति तुलाया: साधकतम भवात माता कारणात्। ब्रह्मसम्मितम् इत्यत्र ब्रह्म वै वेदः।

उक्तञ्च -

पराशरश्च भगवान् जातूकर्ण्यमृषि पुरा।

तमध्यापितवान् दिव्यं पुराणं वेदसम्मितम्।।[12]

प्रमाणानां समीक्षणेन ज्ञायते पुराणं वेदानन्तरं रचितम्। एतेषां पुराणानां विषय: पुराणभेदेन पृथक् पृथक् भवति। वेदमार्गस्यानुसन्धानं सदा पुराणमाध्यमेन विधातव्यम् उक्तञ्च महाभारते -

बिभेत्यल्पश्रुताद् वेदोमामयं प्रहरेदिति

वेदस्य भाषाशैली क्लिष्टा भवति तस्मात् कारणात् पुराणेषु वेदस्य विषय: सरलया भाषया प्रतिपादितः।

छान्दोग्योपनिषदि सनत्कुमारं प्रति अधस्तनं प्रमाणं यथा -

"ऋग्वेदं भगवोध्येमि यजुर्वेदं सामवेदमाथर्वणं चतुर्थमितिहासपुराणं पञ्चमं वेदानां वेदम्, पित्र्यं राशिं दैवं निधिं वाकोवाक्यमेकायनं देवविद्यां ब्रह्मविद्यां भूतविद्यां क्षत्रविद्यां नक्षत्रविद्यां सर्पजनदेवविद्यामेतदद्य भगवोऽध्येमि"[13]

अत्रायं प्रश्नो नास्ति पुराणं वेदादौ आसीत् अथवा वेदानन्तरं। प्रामख्येन तथ्यमिदं वर्तते पुराणं अस्य संस्कृत वाङ्मयस्य प्रमुखं विद्या स्थानं वर्तते । पुराणसाहित्ये समग्रस्य विश्वब्रह्माण्डस्य विस्तृतं ज्ञानविज्ञानमस्ति। अस्य देशस्य संस्कृति: पुराणेषु उपनिवद्धा वर्तते।

मम प्रवन्धस्य सम्बन्ध: पुराणै: सह याथातथ्येन विभाति। यस्याः चर्चा शोध प्रारूपे मया कृता। कानिचित् पुराणानि प्रवन्धस्य सज्जीकरणाय अङगीकृतानि। शोधप्रारूपे येषां पुराणानां क्रमानुरोधेन उपस्थापनं वर्तते तथैव अध्ययनक्रमेऽपि करिष्ये। .सावधानेनेदमपि वोधव्यं भवति यत् पुराणं कपोलकल्पितं नास्ति। सर्वत्र

वेदतुल्यं पुराणं निगदितम्। पुराणेषु यत् प्रमाणमुपलभ्यते तत् सर्वमस्माकं प्रमाणकोटौ भवति। ब्राह्मणग्रन्थेषु च पुराणानां प्रतिष्ठा स्वीकृता। उक्तञ्च गोपथब्राह्मणे ओंकारस्य माहात्म्य प्रसंगे -

"तस्य मकार श्रुत्या इतिहासपुराणं वाकोवाक्यं गाथा नाराशंसी उपनिषद: अनुशासनातीति वृधत् करत् गुहत् तत् शमोम् इति व्याहृति: स्वरशम्यनानातन्त्री: स्वरनृत्यगीतवादित्राणि अन्वभवत् चैत्ररथं दैवतं वैद्युतं ज्योतिर्हितं छन्द: त्रिणवत्रयस्त्रिंशी स्तोमी ध्रुवामूर्खा दिशं हेमन्तशिशिरावृतू श्रोत्रमध्यात्म शब्दश्रवणम् इति इन्द्रियाणि अन्वभवत्"[14]

पुराणस्य यल्लक्षणं प्रामुख्येन श्रूयते तत्र -

**"सर्गश्च प्रतिसर्गश्च वंशोमन्वन्तराणि च"**

राज्ञां वंशवर्णनं पुराणेषु उपलभ्यते। पुण्यकीर्तिणां महाराजानां वंशवर्णनमत्र भवति। प्रायेण गोपालनं कर्म सर्वत्र पुराणेषु प्रसिद्धम्। कर्मेदं पुण्यलाभाय प्रशस्तम्। तथा च सम्पूर्ण राजतन्त्रस्य अर्थतन्त्रं गवाधारितं आसीत्। यस्य राज्ञ: पार्वे यावत्य: गाव: आसन् तथैव तस्य राज्ञ: प्रतिष्ठा आसीत्। सम्पूर्ण कृषिकर्म वृषभेण प्रचलति स्म। तथा यज्ञस्य सम्पादनं प्रजाभिः सह राज्ञ: प्रमुखं कर्म भवति स्म। यज्ञेनैव राष्ट्रस्योन्नति: सम्भवति एष विश्वास: आसीत्। इदानीमपि जना: सुखसमृध्यर्थं यज्ञाचरणं कुर्वन्ति। यज्ञस्य दक्षिणायां गाव: दीयन्ते स्म। किं बहुना गोघृतेन यागस्य सम्पादनं प्रशस्तं मन्यते। एवं सकलं च कर्म गवाधारितमासीत्।

एतत् सर्वं मनसि निधाय शोधप्रारूप मध्ये पञ्च पुराणानि निर्धारितानि सन्ति। तेषां क्रमेण विवेचनं करिष्ये। एतानि सर्वाणि पुराणानि प्रकाशितानि विद्यन्ते। यथाक्रमं पुराणानामन्वेषणं कृत्वा गोतत्वस्य विमर्शो विधीयते।

**वायुपुराणम्**

वायुपुराणं अष्टादश महापुराणेषु परिगणितम्। अस्य कलेवरं नातिदीर्घ नातिहस्वं च वर्तते। अस्य विभाग: पूर्वार्द्ध उत्तरार्द्धाभ्यां कृत:। अयमेको विभाग:। अपरश्च विभाग: पादमाध्यमेन प्राप्यते। सम्पूर्णं पुराणं चतुर्भि: पादै:

विभक्तम्। तत्र पादानां नामानि सन्ति -

1. प्रक्रियापादः
2. उपोद्घातपादः
3. अनुषङ्गपाद:
4. उपसंहारपाद:

पर्वार्द्ध द्वौ पादौ स्त: प्रक्रियापाद: उपोद्घातपादश्च। उत्तरार्द्ध च द्वौ पादौ भवत: अनुषङ्गपाद:, उपसंहारपादश्च। प्रक्रियापादे षडध्याया: सन्ति। उपोद्घातपादे अष्टपञ्चाशत् अध्याया: (58) सन्ति। अनुषङ्गपादे चतुस्त्रिशदध्याया: विद्यन्ते। उपसंहारपादे त्रयोदशाध्याया: पठिता:। सर्वमाहत्य वायुपुराणे एकादशोत्तरशताध्याया: भवन्ति। पूर्वार्द्ध एकषष्टि-अध्याया: उत्तरार्द्ध च पञ्चाशदध्याया: विद्यन्ते।

सर्वप्रथमं पुराणेऽस्मिन् सृष्टिविस्तार: प्राप्यते। पुराणस्य लक्षणे एव सर्ग विस्तारस्य कथनं स्वीकृतम्। चतुभिरध्यायैः सर्गस्य प्रामुख्येन निरूपणं कृतम्। पञ्चमेऽध्याये सृष्टिमध्ये परमेश्वरस्य कथं तावत् अनेकानि नामानि भवन्ति किमत्र कारणं एतत् सर्वं व्युत्पत्तिविधिमाश्रित्य

व्यासेन निरूपितम्। अस्माकं अध्ययने चायं क्लेश उत्पद्यते कथं तावदिदं नामकरणं प्रशस्तम्। पुराकाले स्वेच्छया नाम सम्पादनं नासीत् अपितु नामकरणे हेतुर्भवति तेषां नाम्नां प्राचीनग्रन्थानुसारेण अनुसन्धानं आवश्यकम्। रहस्यानां च उद्घाटनं भवति अत्र प्रसंगानुरोधेन व्युत्पतिलभ्योऽर्थ: लिख्यते -

"योगेश्वर: शरीराणि करोति विकरोति च।
नानाकृति क्रियारूपनामवृत्ति: स्वलीलया।।
त्रिधा यद्वर्तते लोके तस्मात्रिगुण उच्यते।
चतुर्धा प्रविभक्त्वाच्चतुर्ग्रहः प्रकीर्तितः।।
यदाप्नोति यदादते यच्चास्ति विषयं प्रति।
तच्चास्य सततं भावस्तस्मादात्मा निरूच्यते।।
ऋषि: सर्वगतत्वाच्च शरीराद्यात्स्वयं प्रभुः।
स्वामित्वमस्य तत्सर्वं विष्णु: सर्वप्रवेशनात्।।
भगवान् भगसद्भावाद्रागो रागस्य शासनात्।
परश्च तु प्रकृतत्वादवनादोमिति: स्मृतः।।
सर्वज्ञ: सर्वविज्ञानात् सर्व: सर्वं यतस्तत:।
नराणामयनं यस्मात्तेन नारायण: स्मृतः।।
त्रिधाविभज्य स्वात्मानं त्रैलोक्यं सम्प्रवर्तते।
सृजते ग्रसते चैव वीक्षते च त्रिभिस्तु यत्।।
अग्रे हिरण्यगर्भ: स प्रादुर्भूतश्चतुर्मुखः।
आदित्वाच्चादिदेवोऽसावजातत्वादज: स्मृत:।।
पाति यस्मात्प्रजा: सर्वा: प्रजापतिरतः स्मृतः।
देवेषु च महान् देवो महादेवस्तत: स्मृत:।।
सर्वेशत्वाच्च लोकानामवश्यत्वात्तथेश्वरः।
बृहत्वाच्च स्मृतो ब्रह्मा भूतत्वाद्भूत उच्यते।।
क्षेत्रज्ञ: क्षेत्रविज्ञानाद्विभुः सर्वगतो यत:।
यस्मात् पुर्यनुशेते च तस्मात् पुरुष उच्यते।।
नोत्पादितत्वात् पूर्वत्वात् स्वयम्भूरिति स स्मृतः।

इज्यत्वादुच्यते यज्ञ: कविर्विक्रान्त दर्शनात्॥

क्रमण: क्रमणीयत्वाद्वर्णकस्याभिपालनात्।

आदित्यसंज्ञ: कपिलस्त्वग्रजोऽग्निरिति स्मृतः॥

हिरण्यमस्य गर्भोऽभूद्धिरण्यस्यापि गर्भज:।

तस्माद्धिरण्यगर्भ: स पुराणेऽस्मिन्निरुच्यते॥[15]

येषां नाम्नां व्युत्पत्तिप्रदर्शनं पुराणे नैरन्तर्येण कृतं तेषां सर्गव्यवस्थायां भवति महद्योगदानम्। रूपकविधौ इमे मूर्तिमन्त: प्रतिभाति परन्तु चेतनातुल्या: सर्वे सृष्टिस्थितिप्रलयकारका: सन्ति। एतानि सर्वाणि नित्यादिव्य तत्वानि विद्यन्ते। कदाचिदपि एतेषां विनाश: न सम्भवति। अनन्तरं आश्रमाणां विभाग: पुराणेऽस्मिन् विद्यते। चत्वार: आश्रमा: सन्ति। तद्यथा -

गृहस्थो ब्रह्मचारित्वं वानप्रस्थं सभिक्षुकम्।

आश्रमांश्चतुरो ह्येतान् पूर्वमास्थापयत् प्रभुः॥[16]

अनन्तरं वर्णभेदेन आश्रमाणां व्यवस्था प्रकल्पिता। कस्मिन्नाश्रमे कस्य प्रवेश: स्यात् इति सर्वं विवेचितम्। प्रमाणायाध: प्रस्तूयते -

"चातुर्वर्णात्मक: पूर्व गृहस्थश्चाश्रमः स्मृतः।

त्रयाणामाश्रमाणाञ्च प्रतिष्ठायोनिरेव च॥

यथाक्रमं प्रवक्ष्यामि यमैश्च नियमैश्च ते।

दाराऽग्नयोऽथातिथेय इज्याश्राद्धक्रिया: प्रजाः॥

इत्येष वै गृहस्थस्य समासाद्धर्मसंग्रहः।

दण्डी च मेखली चैव ह्यघः शायी तथा जटी॥

गुरुशुश्रूषणं भैक्षं विद्याद्वै ब्रह्मचारिणः।

चीरपत्राजिनानि स्युर्द्धन्यमूलफलौषधम्॥

उभे सन्ध्येऽवगाहश्च होमश्चारण्यवासिनाम्।

आसन्नमुसले भैक्षमस्तेयं शौचमेव च॥

अप्रमादोऽव्यवायश्च दयाभूतेषु च क्षमा।

अक्रोधो गुरुशुश्रूषा सत्यञ्च दशमं स्मृतम्॥

दशलक्षणिको ह्येष धर्म: प्रोक्त: स्वयम्भुवा।

भिक्षोर्व्रतानि पञ्चात्र पञ्चैवोपव्रतानि च॥

आचारशुद्धिर्नियम: शौचं च प्रतिकर्म च।

सम्यग्दर्शनमित्येवं पञ्चैवोपव्रतान्यपि।।

ध्यानं समाधिर्मनसेन्द्रियाणां ससागरैर्भेक्षमथोपगम्य।

मौनं पवित्रोपचितैर्विमुक्ति: परिव्रजोधर्ममिमं वदन्ति।

सर्वे ते श्रेयसे प्रोक्तो आश्रमा ब्रह्मणा स्वयम्।। [17]

पुन: अग्रे गंगादिनदीनां कैलासादिपर्वतानां विविधवंशानां च गाथा प्रसृता। प्रामुख्येन ऋषिवंशवर्णनं, अग्निवंशवर्णनं, देववंशवर्णनम्, पथवंशवर्णनम्, प्रजापतिवंशकीर्तनम्, वरुणवंशवर्णनम्, वैवस्वतमनुवंशवर्णनम्, चन्द्रवंशकीर्तनम्, विष्णुवंशवर्णनम्, चतुर्दशमन्वन्तराणाञ्च विस्तार: कथितः।

वायुपुराणे उत्तरार्द्ध पृथुवंशविस्तारक्रमे वैन्यस्य राज्ञ: प्रजापालनं विस्तरेण वर्णितम्। तस्य वैन्यस्य धर्म कर्म विषये पुराणेऽस्मिन् सर्व तत्वं निगदितम्। प्रजानां संरक्षणाय वैन्य: धनुर्वाणधरो भूत्वा दृढप्रतिज्ञो भवति। यथा -

धनुर्गृहीत्वा बाणाश्च वसुधामाईयदली।

अस्याईनभयवस्ता गौर्भूत्वा प्राद्रवन्मही।। [18]

वैन्यभयात् सा पृथिवी गौर्भूत्वा प्रस्थिता। अत्रेदं विचारणीयं कथं सा विविधेषु जीवेषु गोस्वरूपं धृतवती। अनेन विज्ञायते यत् गौ: सर्वदा अवघ्या भवति। विपरीतायां परिस्थितौ च सदा रक्षणीया गौः। बहुभि: श्लोकैः अस्याः कथाया: विस्तार: प्राप्यते। प्रबन्धस्य महत्ववर्धनाय ते श्लोका: याथातथ्येन अध: लिख्यन्ते –

तां पृथुर्धनुरादाय द्रवन्तीमन्वधावत्।

सा लोकान् ब्रह्मलोकादीन् गत्वा वैन्यभयात्तदा।।

ददर्श चाग्रतो वैन्यं कार्मुकोद्यत धारिणम्।

मयि लोका: .........................।।

अन्नभूता भविष्यामि जहि कोपं महायुते।

अवध्याश्च स्त्रिय: प्राहुस्तिोनिशतेष्वपि।

मत्वैवं पृथिवीपाल धर्मं न त्यक्तुमर्हसि।।

एवं बहुविधं ....................................।।

एकस्यार्थाय यो हन्यादात्मनो वा परस्य वा।

एकं प्राणं बहून् वापि कामं तस्यास्ति पातकम्।।

यस्मिंस्तु निहते भद्रे लभन्ते बहवः सुखम्।

तस्मिन् हते शुभे नास्ति पातकञ्चोपपातकम्।।

सोऽहं प्रजानिमित्तं त्वां वधिष्यामि वसुन्धरे।

यदि मे वचनं नाद्य करिष्यसि जगद्धितम्।।

दुहितृत्वञ्च मे गच्छ एवमेवं महद्वरम्।

मियच्छेत्वान्तु धर्मार्थं प्रयुक्तं घोरदर्शने।।

प्रत्युवाच ततो वैन्यमेवमुक्ता सती मही।

एवमेतदहं राजन् विधास्यामि न संशयः।।

वत्सन्तु मम तं यच्छ क्षेरयं येन वत्सला।

समाञ्च कुरु सर्वत्र मां त्वं धर्मभृतां वर।।

यथा विष्यन्दमानञ्च क्षीरं सर्वत्र भावये।

तत उत्सारयामास शिलाजालानि सर्वशः।

धनुष्कोट्या ततो वैन्यस्तेन शैला विवर्द्धिता:।।

मन्वन्तरेष्वत्तीतेषु विषमासीद्वसुन्धरा।

स्वभावेनाभवस्तस्या: समानि विषमाणि च।।

न हि पूर्वनिसर्गे वै विषमे पृथिवीतले।

प्रविभाग: पुराणां वा ग्रामाणां वापि विद्यते।।

न सस्यानि न गोरक्षा न कृषिर्न वाणिक्पथ:।

चाक्षुषस्यान्तरे पूर्वमेवदासीत्पुरा किला ।

वैवस्वोन्तर तस्मिन् सर्वस्यैतस्य सम्भव:।।

वैन्यात् प्रभृति लोकेऽस्मिन् सर्वस्यैतस्य सम्भवः।।

कृच्छ्रेण महता सोऽपि प्रनष्टास्वोषधीषु वै।

स कल्पयित्वा वत्सन्तु चाक्षुषं मनुमीश्वरः।।

पृथुर्दुदोह सस्यानि स्वतले पृथिवीं ततः।।

सस्यानि तेन दुग्धानि वैन्येन तु वसुन्धराम्।

मनुञ्च चाक्षुषं कृत्वा वत्सम्पात्रे च भूमये।

तेनान्नेन तदा ता वै वर्तयन्ते प्रजा: सदा।।

ऋषिभि: स्तूयते वापि पुनर्दुग्धा वसुन्धरा।

वत्स: सोमस्त्वभूतेषां दोग्धा चापि वृहस्पति:।।

पात्रमासीतु छन्दांसि गायत्र्यादीनि सर्वशः।

क्षीरमासीत्तदा तेषां तपो ब्रह्म च शाश्वतम्।।

पुन: स्तुत्वा देवगणै: पुरन्दरपुरोगमैः।। [19]

एवं प्रकारेण देवा: असुरा: राक्षसा:, किन्नरा:, गन्धर्वाः, अन्ये च सर्वे पृथिवीं स्व-स्व प्रयोजनानुसारं दोग्धुः। दोहन क्रमे यस्य जातिविशेषस्य यत्

प्रयोजनं आसीत् तदेव दुदोह। सर्वप्रथमं मनसि विचार: निष्कलंको भवेत् तदनु स्वेच्छया दाढ्षेण विचारेण कामानां दोहनं कुर्यात्। उत्तरार्द्ध जीवानामुत्पत्ति विषये काचित् नवीना सूचना लभ्यते। यथा –

बहुन्यहानि निःक्षिप्ते सम्भवन्ति च गोमये।

जायन्ते कृमयो विप्रा काष्ठेभ्यश्च घुणादयः।।

कालिदा शतिकेभ्यश्च सर्पा जायन्ति सर्वशः।

संस्वेदजाश्च जायन्ते वृश्चिका: शुष्कगोमयात्।।

गोभ्यो हि महिषेभ्यश्च जायन्ते जन्तव: प्रभो।। [20]

अत्रैव षोडशेऽध्याये गवां तृप्तिकारणाय भोजनम् देयम्। यत्र स्थले गौ: क्षुधयापीडिता भवति दुःखमेव तत्। उक्तञ्च -

'न लभेद्यत्र गोस्तृप्तिं नक्तं यच्चैव गृह्यते।'[21]

अष्टादशेऽध्याये श्राद्धकल्पे दानमाहात्म्यं विस्तरेण साधितम्। श्राद्धकर्म लोकोत्तरकर्मनाम्ना व्याख्यातम्। अस्य कर्मण: प्रकारान्तरेण सर्वत्र सर्वसंप्रदायेषु परिपालनं भवति। यस्यकृते कर्मेदं विहितं स खलु दिवं गतः। तस्य पुत्रादय: सम्बन्धिनश्च श्राद्धं कुर्वन्ति। शास्त्रे अस्य माहात्म्यं बहुधा गीतम्। किं बहुना श्राद्धं कर्म आवश्यकं प्रतीयते। एकैकस्य पदार्थस्य विस्तृतं अक्षय्यं पुण्यं वायुपुराणे कथितम्। तद्यथा -

अतः परं प्रवक्ष्यामि दानानि च फलानि च।

तारणं सर्वभूतानां स्वर्गमार्ग सुखावहम्।।

लोके श्रेष्ठतमं स्वर्ग्यमात्मनश्चापि यत् प्रियम्।

सर्वं पितॄणां दातव्यं तेषामेवाक्षयार्थिना।।

जाम्बूनदमयं दिव्यं विमानं सूर्य सन्निभम्।

दिव्याप्सरोभि: संकीर्णमन्नदो लभते फलम्।।

आच्छादनन्तु यो दद्यादाहतं श्राद्धकर्मणि।

आयु: प्रकाममैश्वर्यं रूपञ्च लभते सुतम्।।

अश्वदानसहस्रेण रथदानशतेन च।

दन्तिनां च सहस्रेण योगिन्या वसते नरः।।

दद्यात् पितृभ्यो योगिभ्यो यस्तूज्ज्वलनमम्भसि।

अथ निष्कसहस्राणां फलं प्राप्नोति मानवः।।

जीवितस्य प्रदानाद्धि नान्यद्दानं विशिष्यते।

तस्मात् सर्वप्रयत्नेन देयं प्राणाभिरक्षणम्।।

अहिंसा सर्वदेवेभ्य: पवित्रा सर्वदायिनी।

दानं हि जीवितस्याहुः प्राणिनां परमं बुधाः।।

लक्षणानि सुवर्णानि श्राद्धे पात्राणि दापयेत्।

रसास्तमुपतिष्ठन्ति भक्ष्या: सौभाग्यमेव च।।

पात्रं वै तैजसं दद्यान्मनोज्ञं श्राद्धभोजने।

पात्रं भवति कामानां रूपस्य च धनस्य च।।

राजतं काञ्चनं वापि दद्याच्छ्राद्धे तु कर्मणि।

दत्वा तु लभते दाता प्रकामं धर्ममेव च।।

धेनुं श्राद्धे तु यो दद्यादृष्टिकुम्भोपदोहनाम्।

गावस्तमुपतिष्ठन्ति गवां पुष्टिस्तथैव च।।

शिशिरेषु तथा त्वग्निं बहुकाष्ठं तथैव च।

इन्धनानि तु यो दद्याविजेभ्य: शिशिरागमे।।

नित्यं जयति संग्रामे श्रिया युक्तश्च दीप्यते।

सुरभीणि च माल्यानि गन्धवन्ति तथैव च।

पूजयित्वा तु पात्राणि श्राद्धे सत्कृत्य दापयेत्।।

गन्धवाहा महानद्य: सुखानि विविधानि च।

दातारमुपतिष्ठन्ति युवत्यश्च मनोरमा:।।

शयनासनानि रम्याणि भूमयो वाहनानि च।

श्राद्धेप्येतानि यो दद्यादश्वमेघ फलं लभेत्।।

श्राद्धकाले निवेद्यं च दर्शश्राद्ध उपस्थिते।

विप्राणां गुणयुक्तानां स्मृति मेघां च निन्दति।।[22]

अन्यान्यपि बहूनि दानानि तत्र प्रशस्तानि तथापि विस्तारभयात् तेषां चर्चा न क्रियते। एतस्य वचनस्य प्रवक्ता साक्षात् बृहस्पति: वर्तते। एकोनविंशेऽध्याये च अष्टका श्राद्धस्य विशेषेण क्रम: प्रतिपादितः। मृतकस्य तृप्त्यर्थं बहुविधानि श्राद्धानि ग्रन्थेषु चर्चितानि तत्रापि अष्टकाश्राद्धस्यानेके

भेदाः भवन्ति। अस्य श्राद्धस्य च पात्रभेदेन कालभेदेन च द्रव्याणि पृथक् पृथक् भवन्ति। अत्र प्रामुख्येन इदं ज्ञेयं यत् द्रव्याणां निर्णय: देशकालपात्राणां च सम्यक् मीमांसया क्रियते। इदानीन्तना: निर्णायका: न भवन्ति। प्रायेण शास्त्रेषु सर्वेषां पक्षाणां रहस्योद्घाटनं कृतमस्ति अत्रैव बृहस्पते: वचनं अस्मिन्नेवाध्याये उल्लिखितम्। वचनमीमांसया वर्तमानपरिप्रेक्ष्ये क्लेश: सम्भवति तथापि प्रमाणं सदा शास्त्रमेव। काम्यनिमित्तनित्यादिभेदेन श्राद्धं तावत् त्रिविधम्। उक्तञ्च -

काम्यनैमित्तिकाजस्रं श्राद्धकर्माणि नित्यशः।

पुत्र दारधनमूला अष्टकास्तिस्र एव च।।

पूर्वपक्षो वरिष्ठो हि पूर्वाचित्री उदाहृता।

प्राजापत्या द्वितीया स्यात् तृतीया वैश्वदेवकी।।

आद्यापूपैः सदा कार्या मांसैरन्या भवेत् सदा।

शाकैरन्या तृतीया स्योददं द्रव्यगतो विधिः।।

अन्वष्टका पितॄणां वै नित्यमेव विधीयते।

यद्यन्या चतुर्थी स्यात्ताञ्च कुर्याद्विशेषत:।।[23]

अनेन विधिना श्राद्धस्य भेदा: प्रकल्पिता:। अन्यष्टका श्राद्धस्य प्रसंग: ङ्केगृह्यसूत्रेष्वपि प्राप्यते। अष्टकायाः विधानं पद्धति भेदेन पृथा पृथा दृश्यते। वायुपुराणस्य कथनं इदमपि अस्ति यत् पितॄणां पूजनं सर्वकालेषु भवितुमर्हति। तस्मात् विदुषां समाजे नित्यतर्पणस्य विधानं श्रूयते। देवपूजनात् प्राक् जलेन पितॄणां तर्पणं विहितम्। ते पितर: सदा अन्वयानां कल्याणाय सुखाय पुत्रादीनां

च सर्वविधसौख्यप्रदानाय समीपे भवन्ति। सामान्यञ्चावाहनं श्रुत्वा आशुरेव द्रवन्ति। यथा जलपानाय धेनव: जलाशयं प्राप्नुवन्ति। बहुत्र पशूनां जलपानाय पात्रमेकं जलापूरितं गृहस्य मार्गस्य पार्श्वे स्थापितं भवति। तत्र गवा पिपासानिवृत्यर्थं नित्यमेव आगच्छन्ति। उक्तञ्च -

पितर: सर्वकालेषु तिथिकालेषु देवताः।

सर्वे पुरुषमायान्ति निपानमिव धेनवः।।[24]

वायुपुराणे अत्रैव प्रसंगे रहस्यं किञ्चिदुद्घाटितम् तच्चरहस्यं सर्वथा शोधार्थिभि: ज्ञातव्यं भवति। अस्माकं मनसि एक: प्रश्न: अथवा शंका उदेति मृतक: स्व-स्व कर्मानुरोधेन शरीरमवाप्नोति तर्हि श्राद्धेन दत्तेन च को लाभ: कथं दीयते दानम्। कस्मै हेतवे। अस्य समाधानं कुर्वन्नाह यदिदं सत्यम् वर्तते कर्मणा शरीरं प्राप्नोति परन्तु यस्मिन् कस्मिन्नपि शरीरे असौ भवति तत्रैव तस्य शरीरस्य कृते यदन्नं तस्मिन् रूपे तत्र

प्राप्यते। नात्र संदेहः कर्तव्यं। शास्त्रस्य वचनं सर्वदा प्रमाणम् केवलेन कुतर्केण शास्त्रस्य खण्डनं च कार्यम् खण्डनाय च शास्त्रप्रमाणमेव भवति। उक्तञ्च -

सर्वत्र वर्तमानास्ते पिण्डा: प्रीणन्ति वै पितॄन्।

यदाहारो भवेज्जन्तुराहार: सोऽस्य जायते।।[25]

अत्रैकमुदाहरणं उपमामुखेन वायुपुराणे प्रदत्तम्। गोष्ठे शतश: गाव: भवन्ति। तत्र कदाचित् वत्स: मातुः सकाशात् दूरे गच्छति। व्याकुलोऽसौ वत्स:

इतस्तत: सर्वत्र गोष्ठे अन्वेषयति। गौश्च व्याकुला भूत्वा वत्समन्वेषयति तथा प्रयासेन झटिति मातरं प्राप्नोति। तथैव दिवंगत: मृतक: स्वकर्मवशात् यस्यां कस्यां च योनौ भवेत् अवश्यमेव प्राप्नोति एतत् सर्वं अधस्त श्लोक प्रमाणेन उपन्यस्तम् -

यथा गोष्ठे प्रनष्टां वैवत्सो विन्दति मातरम्।

तथा तं नयते मन्त्रो जन्तु यंत्रावतिष्ठते।।

नाम गोत्रं च मन्त्रश्च दत्तमन्नं नयन्ति तम्।

अपि योनिशतं प्राप्तांस्तृप्तिस्ताननु गच्छति।।

एवमेषा स्थिता संस्था ब्रह्मणा परमेष्ठिना।

पितॄणामादिसर्गस्तु लोकानामक्षयार्थिनाम्।।

इत्येते पितरो देवा देवाश्च पितर: पुनः।

दौहित्रा यजमानाश्च प्रोक्ताश्चैव मयानद्या:।।[26]

अस्मिन्नेव पुराणे उत्तरार्द्ध षड्विशतमेऽध्याये विश्वामित्रवशिष्ठयो: कलहस्य कथा पठ्यते। विश्वामित्र: राजर्षिः आसीत् इति शास्त्रेषु परिगीतम्। सत्यव्रतनामक: राजपुत्र: अधर्म साधनात् राज्यात् पित्राबहिष्कृतः। पापाचरणात् द्वादश वर्षाणि यावत् इन्द्रो न ववर्षः। तस्मिन्नेव काले विश्वामित्र: पुत्रान् पत्नी च त्यक्त्वा तपश्चरणाय वनं जगाम। दुर्भिक्षात् पृथिव्यां अन्नानामभाव: वृक्षेषु पत्राणां फलानां च सर्वथाऽभावोभूत्। अत: विश्वामित्रस्य पत्नी मध्यमं पुत्रं रज्ज्वानुबन्धनं कृत्वा विक्रयणार्थं गच्छति।

बालकस्य राजपुत्र: चाण्डालवेषधर: तं बालकं मोचयामास -

तस्मिंस्तु विषये तस्य नावर्षत् पाकशासनः।

समा द्वादश संपूर्णास्तेनाधर्मेण वै तदा।।

दारांस्तु तस्य विषये विश्वामित्रो महातपाः।

संन्यस्य सागरानूषे चचार विपुलं तपः।।

तस्य पत्नी गले बद्ध्वा मध्यमं पुत्रमौरसम्।

शिखयाभरणार्थाय व्यक्रीणाद्गोशतेन वै।।

तं तु बद्धं गले दृष्ट्वा विक्रीतं तं नरोत्तमः।

महर्षि पुत्रं धर्मात्मा मोक्षयामास सुव्रतः।।

सत्यव्रतो महाबुद्धिर्भरणं तस्य चाकरोत्।

सोऽभवद् गालवो नाम गले बद्धो महातपाः।।

सत्यव्रतस्तु बाल्यात्तु भाविनोऽर्थस्य वै बलात्।

वसिष्ठेभ्यधिकं मन्युं धारयामास मन्युना।। [27]

सत्यव्रत: वसिष्ठं प्रति सदा क्रोधयुक्त: आसीत्। क्रोध: कल्याणाय न भवति नाशाय एव। तस्मात् विवेकेन क्रोधस्य शमनं कुर्यात्। परन्तु असौ राजपुत्र: वसिष्ठस्य तिरस्करणाय मनसि क्रोधं धारयामास। एकदा स सत्यव्रत: रोषात् मांसस्याभावे वसिष्ठस्य यज्ञधेनुं हतवान्। गोवध: शास्त्रे सर्वथा निन्दितः। समाजे च तादृशस्य पुरुषस्य कृते स्थानं न भवति तत्रापि यज्ञधेनो: वध: अहो कोपस्य क्रोधस्य च विडम्बना। कोप: किं किं न कारयति यथा चाह -

अविद्यमाने मांसे तु वसिष्ठस्य महात्मनः।

सर्वकाम दुघां धेनुं संददर्श नृपात्मजः।।

तां वै क्रोधाच्च मोहच्च श्रमाच्चैव बुधान्वित:।

दस्युधर्मं गतो दृष्ट्वा जघान बलिनां वरः।।

स तु मांसं स्वयं चैव विश्वामित्रस्य चात्मजान्।

भोजयामास तच्छ्रुत्वा वसिष्ठस्तं तदात्यजत्।।

प्रोवाच चैव भगवान् वसिष्ठस्तं नृपात्मजम्।

पातये क्रूरे हे क्रूर तव शंकुमयोमयम्।।

यदि ते त्रीणी शंकूनि न स्युर्हि पुरुषाधम।

पितुश्चापरितोषेण गुरोर्दोग्ध्रीवधेन च।।

अप्रोषितोपयोगाच्च त्रिविधस्ते व्यतिक्रमः।

एवं स त्रीणी शंकूनि दृष्ट्वा तस्य महातप:।।

त्रिशंकुरिति होवाच त्रिशंकुस्तेन स स्मृत:।[28]

एवं समस्तस्य वायुपुराणस्य समीक्षणेन गौतत्वविमर्श: प्रस्तावित:। वायुपुराणे अग्रे गयाया: माहात्म्यं वर्णितम्। गयातीर्थस्य प्रसिद्धि: पूर्वजानां समुद्धाराय भवति। विशिष्य पिण्डदानस्य महत्वं तत्र कथितम्। तत्रैव मध्ये दानप्रसंगे गोदानस्य महत्वं च प्रसारितम्। समग्रस्य

पुराणस्यात्र अवलोकनं कृतम्। वायुपुराणे गोतत्वस्य पृथक्तया वर्णनं न प्राप्यते। न च स्तवनं तथापि प्रकरणानां अध्ययनं कृत्वा यत्किञ्चिदुपलब्धं तत् सर्वं प्रवन्धेऽस्मिन् निरूपितम्।

अस्माकं देशस्य प्राचीनाशिक्षा सदा अनुकरणीया भवति। गुरुकुलेषु सर्वत्र अखिलेभारते वर्षे गोपालनस्य महत्वमासीत्। एकेनैव गोपालनकर्मणा गुरुकुलस्य सर्वकार्य सम्यक् प्रचलति। छात्राणां कृते दुग्धस्य, दध्नः, घृतस्य, इन्धनस्य च प्राप्तिः तेनैव कर्मणा सिद्ध्यति। अन्नानां लाभाय वृषभः तेनैव कर्मणा उत्पद्यते। कार्यं तथा कर्तव्यं बहूद्देश्यस्य पूर्तिः यथा स्यात्। अनेकेषां प्रयोजनानां कृते गोपालनं प्रशस्तम्। अन्यथा वर्तमानकालस्य यद्विज्ञानमायाति न तत् अस्माकं जीवनस्य उन्नत्यै वर्तते। किं बहुना विश्वस्य बह्वीनां समस्यानां समाधानं अनेनैव कर्मणा सम्भवति।

वायुपुराणस्याध्ययनं अस्माकं कृते आवश्यकं प्रतिभाति।

**पद्मपुराणे गोतत्त्वविमर्शः**

पद्मपुराणं बृहदाकारकं पुराणश्रेष्ठं च वर्तते। अस्मिन्पुराणे अनेके विषयाः प्रतिपादिताः। पुराणस्य माहात्म्यमपि अत्र परिगीतम्। यथा -

'पुराणं सर्वशास्त्राणां प्रथमं ब्रह्मणा स्मृतम्' [29]

अन्यत्रापि -

बहुशास्त्रं समभ्यस्य बहुवेदान् सविस्तरान्।
पुंसोऽश्रुतपुराणस्य सम्यग्याति न दर्शनम्।।[30]

पुनरग्रे -

पिशाचाः प्रायशो नाम ब्रह्मराक्षसनामकाः।
वेदमन्त्रस्य वेत्तारो दृश्यन्ते न पुराणवित्।।[31]

पुनश्च -

पुराणयिमुखो नैव सर्वः सर्वं न पश्यति[32]

पुराणपाठस्य भारतदेशे भवति प्रतिष्ठा। लोकाः संघीभूय पुराणानां श्रवणं कुर्वन्ति। पुराणश्रवणं धर्मस्य कार्यं मन्यते। उत्सवविधिपूर्वक पुराणपाठस्यायोजनं भारते ग्रामे ग्रामे भवति। बहुत्र ग्रामेषु एका परम्परा प्रचलिता जीवने एकदा अवश्यमेव पुराणस्य श्रवणं कुर्यात्। समाजे प्रतिष्ठायाः विषयः अनेन पुराणपाठस्यायोजनं कृतम्। लोके निन्दा च प्रवर्तते यद् अनेन कृपणेन पुराणपाठस्यायोजनं नैव कृतम्। कथं स्वर्गलाभः सुखस्य प्राप्तिश्च। अतएव भारतेवर्षे प्रदेशभेदेन पुराणानां महत्वं श्रूयते। पुराणपाठस्य फलं अस्मिन्नेव पुराणे साधितम् यथा -

'पुराणं शृणुयान्नित्यं महापापदवानलम्।'[33]

साक्षात् व्यासो ब्रूते महापापस्य नाशाय पुराणस्य श्रवणं जीवने कर्तव्यम्। यथा दावानले वनस्य सर्वे वृक्षा: भस्मीभूता: जायन्ते तथैव पुराणपाठात् महापापस्य समग्रस्य दहनं सुनिश्चितम्।

तत्रैव पुन: -

पुराणं सर्वतीर्थेषु तीर्थं चाधिकमुच्यते।

यस्य पादैकश्रवणाद्धरिरेव प्रसीदति।।[34]

तथा च -

यथा सूर्यवपुर्भूत्वा प्रकाशाय चरे द्धरिः।

सर्वेषां जगतामेव हरिरालोक हेतवे।।

तथैवान्त: प्रकाशाय पुराणावयवो हरिः।

विचरेदिह भूतेषु पुराणं पावनं परम्।।

तस्माद्यदि हरे: प्रीतेरुत्पादे धीयते मतिः।

श्रोतव्यमनिशं पुंभि: पुराणं कृष्णरूपिणः।।[35]

पुराणानां नामकरणे भवति किञ्चिद्वीजं स्वेच्छया यादृच्छिकं नाम नैव भवति अतएव अस्य पुराणस्य नामकरण विषये अत्रैव अन्त: साक्ष्यमस्ति -

एतदेव महापद्ममद्भुतं यन्मयं जगत्।

तद्वृत्तान्ताश्रयं तस्मात्पाद्ममित्युच्यते बुधैः।।[36]

पद्मपुराणस्य परिमाणं प्रबन्धस्य कृते महत्वपूर्ण विभाति।

अस्य पुराणस्य विभाग: सर्वप्रथमं खण्डेषु प्राप्यते तत्र सप्त खण्डानि स्मृतानि।

1. सृष्टिखण्डम्

2. भूमि खण्डम् 3. स्वर्गखण्डम्

4. ब्रह्माखण्डम्

5. पातालखण्डम्

6. उतरखण्डम्

7. क्रियाखण्डम्

उक्तञ्च पद्मपुराणे परिमाणविषये -

सहस्रं पञ्चपञ्चाशत् पञ्चखण्डै: समन्वितम्।

तत्रादौ सृष्टिखण्डं भूमिखण्डं ततः परम्।

स्वर्गखण्डं ततः पश्चात्ततः पातालखण्डकम्।

पञ्चमं ततः ख्यातामुत्तरं खण्डमुत्तमम् ।। [37]

सृष्टेखण्डस्य उपर्युक्ताभ्यां द्वाभ्यां श्लोकप्रमाणाभ्यां पञ्चखण्डानामेव समर्थनं भवति।

तत्रैव स्वर्गखण्डे सप्तखण्डानि समर्थितानि।

प्रवक्ष्यामि महापुण्यं पुराणं पद्मसंज्ञितम्।

सहस्रपंचपंचाशत्षड्भिः खण्डैः समन्वितम्।।

तत्रादावादिखंडं स्याद् भूमिखंडं ततः परम्।

ब्रह्मखंडं च तत् पश्चात्ततः पातालखंडकम्।।

क्रिया खंडं ततः ख्यातनुत्तरं खंडमंतिमम्।

एतदेव महापद्ममद्भुतं यन्मयं जगत्।।[38]

अस्य पुराणस्यान्तर्विभागः पर्वमाध्यमेनापि कृतं वर्तते। तद्यथा -

'पञ्चभिः पर्वभिः प्रोक्तं संक्षेपाद् व्यासकरितात्।

पौष्करं प्रथमं पर्व यत्रोत्पन्नं स्वयं विराट्।।

द्वितीयं तीर्थपर्वस्यात् सर्वग्रहणाश्रयम्।

तृतीयं पर्वग्रहणा राजानो भूरिदक्षिणाः।।

वंशानुचरितं चैव चतुर्थं परिकीर्तितम्।

पञ्चमे मोक्षतत्वं च सर्वतत्वं निगद्यते।।

सामान्येन पुराणस्यास्योपर्युक्तः कश्चिद् विभागः वर्तते।

सम्प्रति पुराणस्य सम्पूर्णस्यावलोकनं क्रियते गोतत्वविमर्श विषये। भगवताविष्णुना सह गौः सदा वसति। विष्णोः माहात्म्यं अवतारभेदपूर्वकं पुराणेऽस्मिन् परिगीतम्। प्रथमे सृष्टिखण्डे क्वचित् कथायां गोतत्वस्य प्रसंगः प्राप्यते। परन्तु उपमोपमेय भावेन तद् वर्णनमतिसंक्षिप्तमेव।

पद्मपुराणे पातालखण्डे त्रिंशेऽध्याये धेनोः माहात्म्यं विस्तरेण प्रश्नोत्तराभ्यां वर्णितम्। कथायां कस्यचित् तेजः पुरस्याख्यानं वर्तते। अस्मिन् पुरे धर्मस्य समग्रस्य उत्साहपूर्वकेन पालनं भवति। नगरस्य सौन्दर्यं दृष्टवैव जनो मोहितो भवति। तत्रस्थः राजा परमधार्मिकः सत्यसंघश्च वर्तते। अनेकेषां यज्ञानां संपादकः राजा नगरस्य प्रशासको वर्तते। यथा चोक्तं -

धेनुप्रसाद्य बहुभिर्द्रतैर्ये प्रापतत्पिता।

ऋतं भराख्यो जगति ख्यात: परमधार्मिकः।।

गौ: प्रसन्नाददौ पुत्रमनेकगुण संस्कृतम्।

सत्यवतं सुशोभाढ्यं तंजानीहिनृपोत्तमम्।।[39]

इदानीमपि जना: पुत्रप्राप्त्यर्थं नानाविधम्। उपायं कुर्वन्ति तत्रापि सर्वगुणसम्पन्न: पुत्रो भवेदथवा केवल: पुत्र इति संशय: भवति। परन्तु पद्मपुराणस्य -

उपर्युक्त प्रमाणेन सिद्धमिदं यत् गो सेवया धर्मयुक्त: सन्तति: भवति। श्लोके स्पष्टमुद्घोषो विद्यते गौ: प्रसन्ना जाता चेत् निश्चितमेव सर्वमभिलषितं कामं सिद्ध्यति। अयं प्रसंग: पुराणोक्त: सामाजिकानां हिताय संक्षिप्य दीयते। शत्रुघ्न उवाच -

को वा ऋतं भरो राजा किमर्थं धेनु पूजनम्।

कथं प्राप्त: सुतस्तस्य वैष्णवो विष्णुसेवकः।।

महापातकपर्वतम्।।

शेष उवाच

ऋतंभरोनरपतिरनपत्यः पुराभवत्।

कलत्राणि बहून्यस्य न पुत्रं प्राप्तेषु वै।।

तदाजाबालिनामानं मुनिं दैवादुपागतम्।

पप्रच्छ कुशलोद्युक्त: सपुत्रोत्पत्तिकारणम्।।

स्वामिन् वंध्यस्य मे ब्रूहि पुत्रोत्पत्ति करं वचः।

यत्कृत्वा जायतेऽपत्यं ममवंशधरं वरम्।।

तज्ज्ञात्वा भवतो भव्यं प्रकुर्यां निश्चितं वचः।

दानं व्रतं वा तीर्थं वामरवं वामुनिसत्तम्।

इति राज्ञो वच: श्रुत्वा जगादमुनिसत्तमः।।

सुतोत्पत्तिकरं वाक्यं प्रणतस्य सुतार्थिनः।

अपत्यप्राप्तिकामस्य संत्युपायास्त्रय: प्रभो।

विष्णो: प्रसादो गोश्चापिशिवस्याप्यथवापुनः।।

तस्मात्त्वं कुरुवै पूजां धेनोर्देवतनोनृप।

यस्या: पुच्छे मुखे शृंगे पृष्ठे देवा: प्रतिष्ठिता:।।

सा तुष्टा दास्यति क्षिप्रं वांछितं धर्मसंयुतम्।।

एवं विदित्वा गोपूजां विधेहित्वमृतंभर।

यो वै नित्यं पूजयति गां गेहेयवसादिभिः।

तस्य देवाश्च पितरो नित्यं तृप्ता भवति हि॥

यो वै गवाह्निकं दद्यात् नियमेन शुभव्रतः।

तेन सत्येन तस्य स्युः सर्वेपूर्णामनोरथाः॥

तृषिता गौगृहेबद्धा गेहे कन्या रजस्वला।

देवता च स निर्माल्याहंति पुण्यं पुराकृतम्॥

यो वै गां प्रतिषिद्ध्येत चरंती स्वं तृणं नरः।

तस्य पूर्वे च पितरः कंपंते पतनोन्मुखाः॥

यो वै यष्ट्याताडयति धेनुमो विमूढधीः।

धर्मराजस्यनगरं स याति करवर्जितः॥

यो वै दंशान्वारयति तस्य पूर्वेयधोगताः।

नृत्यंति मत्सुतोह्यस्मांस्तारयिष्यति भाग्यवान्॥

अत्रैवादाहरंतीममितिहासं पुरातनम्।

जनकस्य पुरावृत्तं धर्मराजपुरेद्भूतम्॥

एकदा जनको राजा योगेनासून्परित्यजन्।

तदा विमानं संप्राप्तं किंकिणीजाल भूषितम्॥

तदारुह्यगतोराजा सेवकैरूढदेहवान्॥

मार्गेजगामधर्मस्य संयमिन्याः पुरोन्तिके।

तदानरककोटीषु पीड्यन्ते पापकारिणः॥

जनकस्यांगपवनं प्राप्य सौख्यं प्रपेदिरे।

निरये दाहजापीडाजातैषां सुखकारिणी॥

महादुःखं तदानष्टं जनकस्यांगवायुना।

तदा तं निर्गतं दृष्ट्वा जंतवः पापपीडिताः॥

अत्यंतं चुक्रुशुीतातद्वियोगमनिच्छवः।

ऊचस्ते करुणां वाचं मागच्छसुकृतिन्नितः॥

त्वदंगवायुसंस्पर्शात्सुखिन: स्यामपीडिता:।

इति वाक्यं समाकर्ण्यराजापरमधार्मिकः।।

मानसेचिंतयामास करुणापूरपूरित:।

चेन्मत्त: प्राणिनां सौख्यं भवेदिहतद पुन:।।

अत्रैव च पुरेस्थास्ये स्वर्ग एषमनोरम:।।

एवं कृत्वा नृपस्तस्थौ तत्रैव निरयाग्रतः।

विदधत् प्राणिनां सौख्यमनुकंपितमानस:।।

तत्र धर्मस्तु संप्राप्तो निरयद्वारिदु:खदे।

कारयन् यातनास्तीवानानापातककारिणाम्।।

तदाददर्शराजानं जनकं द्वारि संस्थितम्।

विमानेनमहापुण्यकारिणं दययायुतम्।।

तमुवाचप्रेतपतिर्जनकं सहसनिगरा।

राजन् कुतस्त्वं संप्राप्त: सर्वधर्मशिरोमणि:।।

एतत्स्थानं पातकिनां दुष्टानां प्राणघातिनाम्।

नायातिपुरुषाभूपत्वादृशा: पुण्यकारिण:।। अ

त्रायांति नरास्तेवै ये परद्रोहतत्परा:।

परापवाद निरता: परद्रव्यपरायणा:।।

त्वं गच्छ नरशार्दूल पुण्यराशि विधायकः।[40]

अत्र आख्यायिकायां साक्षादनुभवामि यत् जनकस्य पुण्यप्रभावात् पापिन: सुखिनो जाता:। इति एक: पक्ष:। अपरस्तु पक्ष अत्र आगच्छति जनकस्य किं पापमासीत् येन नरकस्य समीपे गमनमभवत्। सर्वत्रायं विश्वास: पुण्येन कर्मणा सुखस्थानं पापेन च निरयस्थानं गम्यते। तस्मात् जनक: परमधार्मिक: धर्मराज पप्रच्छ किं मे पापमासीत् कस्य पापस्य निरसनार्थं इदं दृष्टान्तं दु:खमयं मया अवलोकितम् -

मदागमनमत्राभूत्केनपापेन धार्मिक।

तथापिपालेशस्ते वर्तते नृपसत्तम्।

येन संयमिनीपार्श्वमागत: पुण्यपूरित:।।

एकदातुचरंती गां वारयामास वैभवान्।

तेन पापविपाकेन निरयद्वार दर्शनम्।।

इदानीं पापनिर्मुक्तो बहुपुण्यसमन्वितः।

भुंक्ष्व भोगान् सुविपुलान् निजपुण्यार्जितान्बहून्॥[41]

जीवने पापस्य लेशमात्रमपि कष्टप्रदं भवति। जनकस्य जीवने एकमेव पापमासीत् यत् चरतींगां वारयामास। अत्रेदं ध्यातव्यं भवति पुण्यकर्मणा पापस्य नाश: न संभवति प्रत्युत पुण्यस्य फलं पापस्य च फलं पृथक् पृथक् आयाति। तस्मात् इदं न मन्तव्यं पापाचरणं कृत्वा कालान्तरे बहुपुण्यं करिष्ये तेन पुण्येन च पापभागस्य समाप्ति: स्यात् कदाचिदपि न भविष्यति। अत्रैव जाबाले: वचनं स्मरण योग्यं भवति -

तस्माद्गावोऽनिशं पूज्यामनसापि न गर्हयेत्।

गर्हयन्निरयं याति यावदिद्राश्चतुर्दश॥

तस्मात् त्वं नृपतिश्रेष्ठ गोपूजां वै समाचर।

सा तुष्टादास्यतिक्षिप्रं पुत्रं धर्मपरायणम्॥

सुमतिरुवाच -

तच्छ्रुत्वा धेनुपूजां सपप्रच्छकथमादरात्।

पूजनीयाप्रयत्नेन कीदृशं कुरुते नरम्॥

जाबालि: कथयामास धेनुपूजां यथाविधि।

प्रत्यहं विपिनं गृच्छेच्चारणार्थव्रतीतु गो:।

गवेयवांस्तुसंभोज्यगोमयस्थान्समाहरेत्॥

भक्षणीयायवास्तेतु पुत्रकामेन भूपते।

सायदापिबतेतोयं तदापेयं जलंशुचि।

सोच्चै: स्थानेयदातिष्ठेतदानीं चासनस्थितः॥

दंशान्निवारयेन्नित्यं यवसंस्वयमाहरेत्।

एवं प्रकुर्वत: पुत्रं दास्यते धर्मतत्परम्॥

इति वाक्यं समाकर्ण्य पुत्रकामऋतंभरः।

व्रतं चकारधर्मात्मा धेनुपूजां समाचरन्।

प्रत्यहं कुरुते गां वैयवसायेनतोषिताम्।

दशान्न्यवारयद्धीमान्यवभक्षकृतादरः॥

एवं धेनुं पूजयतो गतास्तुदिवसाधना:।

वनमध्येतृणादींश्चचरंती मकुतोभयाम्॥

एकदानृपतिस्तस्यवनस्य श्री निरीक्षणे।

न्यस्तदृष्टि: सपरितोबभ्रामसकुतूहली।।

तदागत्याहन गांव पंचास्य: काननां तरात्।

क्रोशंती बहुधादीनां सिंहभारेण दुःखिताम्।।

तदा नृपः समागत्य विलोक्य निजमातरम्।

सिंहेननिहितां पश्यन्नुरोदातीवविह्वल:।।

सदुःखित: समागत्य जाबालिं मुनिसत्त्मम्।।

निष्कृतिं तस्य पप्रच्छगोवधस्य प्रमादतः।

स्वामिंस्त्वदाज्ञया धेनुं पालयन्वनमास्थितः।।

कुतोप्यागत्यतांसिहोजघानादृष्टिगोचरः।।

तस्य पापस्य निष्कृत्यै किं करोमित्वदाज्ञया।

कथं वा व्रतसंपूर्तिर्ममपुत्रप्रदायिनी।।

इत्युक्तवंतंभूपं जगादमुनिसत्तमः।

संत्युपायामहीपालपापस्यापनुत्तये।।

ब्रह्मघ्नस्यकृतघ्नस्यसुरापस्यमहामते।

प्रायश्चित्तानिवर्तते सर्वपापहराणि च।।

अज्ञानप्राप्तगोहत्या प्रायश्चित्तं तु विद्यते।

रामभक्तं तु धीमंतं याहित्वं ऋतुपर्णकम्।।

रामंस्मरंस्त्वं धर्मात्मन् धेनुं पालयसत्तम्।

दत्वा द्विजायकनकं पापनिष्कृतिमाप्स्यसि।।

एतच्छुत्वातु तद्वाक्यमृतंभरनृपस्तदा।

विधायरामस्मरणं पूतात्मावतमाचरत्।

पूर्ववत् पालयन्धेनुं जगामविपिनं महत्।

रामनामस्मरन्नित्यं सर्वभूतहितेरत:।।

तस्मै तुष्टा तु सुरभि: प्रोवाचपरितोषिता।

राजन्वरयमत्तो वैवरंहृत्स्थं मनोरथम्।।

तदा प्रोवाच वै राजा पुत्रं देहि मनोरमम्।
रामभक्तं पितृरतं सर्वधर्मप्रतिपालकम्।।
तुष्टा दत्वावरं सापि तस्मै राज्ञे सुतार्थिने।
जगामादर्शनं देवी कामधेनु: कृपावती।। [42]

एषा कथा पद्मपुराणस्य सर्वैः पठनीया भवति। अद्यतनीये समाजे सन्ततिसुखलाभाय जना: बहुविधमुपायं कुर्वन्ति तथापि फलं कदाचित् भवति कदाचित् न दृश्यते। तत्रापि वैज्ञानिकपद्धत्या नेदं सुनिश्चितं कस्य पुरुषस्येदं अपत्यं दम्पतीभ्यां लब्धम्। कथाया: समालोचनेन विज्ञायते गौ: अस्य संसारस्य सर्वधनरूपा भवति। एका गौ: सर्वमभिलषितं कामं पूरयति। किं बहुना गोपालेन सर्वं सौख्यं लभते मनुष्यः। रोगाणामपाकरणं वंशस्य च विस्तार अनेनैव कर्मणा भवति। पद्मपुराणे उत्तरखण्डे महाराजस्य दिलीपस्य कथा माध्यमेन गोसेवाया: माहात्म्यं विस्तरेण उद्गीरितम्। तत्र कथायां वैवस्वतवंशोद्भव: महाराजादिलीप: धर्मेण राज्यं शशास। बहुकालं यावत् महाराजा दिलीप: शासनं कृत्वा चिन्तामग्नोऽभवत् स्वगृहीतभार्यायां पुत्रं न प्राप। चिन्तामग्नोऽसौ राजा वशिष्ठं प्राप्तवान्। वसिष्ठ: गोसेवाया: उपदेशं कृतवान्। गोसेवायाश्च फलमपि उपदिदेश। अयं कथाप्रसंग: साम्प्रतिके काले समेषां कृते प्रासंगिक: प्रतिभाति। अत: कथाया: यथार्थभाव प्रकटनाय प्रबन्धस्य च गौरवाय कथाया: प्रकाशनमावश्यकम्।

मूलमेवाश्रयेऽत्र - देवल उवाच

शृणुष्वभोमहाप्राज्ञ दिलीपस्यमहीपतेः।
कयां दिव्यं विचित्रां च शृणुतां पापनाशिनीम्।।
वैवस्वतमनोवंशेदिलीपो भूभुजां वरः।
आसीत् प्राचीन बर्हिस्तु स्वायंभुवमनोरिव।।
स तु धर्मभृतां श्रेष्ठो धर्मेणप्रतिपालयन्।
महीं महीपतिर्लोकान् गुणैराद्धररंजयत्।।
मगधाधिपते: पुत्री महिषीतस्य भूपतेः।
सुदक्षणाख्ययाख्याताशचीवासीद्दिवस्पते:।
दध्यावितिनिजस्वांतेस सम्राटकोशलाधिपः।।
रत्नाकर सुमेदिनगररत्नैर्विराजितम्।
धृतं भूवलयं दोषो भूषायैनाप्रजस्यमे।।
वर्गत्रयी यथाकालं सेवितानविरोधिता।
तथापि मे नृपत्यस्यन सौख्यं विद्यते हृदि।

यज्ञैराराधितो विष्णुरिंद्राद्याश्चसुरोत्तमाः।

दीर्घिकारामकूपाश्च कारिताः सर्वतो भुवि।।

गोभूहिरण्यवासोभिः षड्सान्वितभोजनैः।

विप्रा अतिथयश्चैवभक्त्या संतोषितामया।

वृत्यर्थं पृथिवीपालानुद्धृत्ययुधि धर्मतः।।

धनेन महता कोशोमया हि बहुलीकृत:।।

उन्मार्गगामिनोमत्तानिजधर्मविलंघिन:।

विमुख: पितृदेवेभ्यो दंडयास्ते दंडितामया।।

पंचपर्व सुवैष्णव्यां रवौपित्र्ये च कर्मणि।

दशम्यैकादशीतिथ्योर्न स्त्रीसेवाकृतामया।।

ऋतुकालावधौ स्नातां स्वस्त्रियं नाहमत्यजम्।

अनृतावपितद्योग्ये काले चेत्प्रार्थितस्तया।।

तदातस्यां सकामिन्यां सकामं रमितं मया।

एवं धर्मार्थकामामे यथाकालं निषेविता:।।

महिष्यां केन दोषेण जायते मे न संतति:।

कथयिष्यति तं दोषं यन्मे पुत्रो न जायते।।

देवल उवाच -

इत्यालोच्य सभूपालोगमिष्यन्नाश्रमं गुरो:।

मंत्रिष्वारोपयामासकोशलामृद्धिकोशलाम्।।

अथ प्रजासृजं देवं पूजयित्वाश्रमं गुरो:।

प्रतस्थाते पुत्रकामौ दंपती तौ शुभेहनि।।

कातिचिद्वासरैमार्गमुल्लंघ्यै करथेस्थितौ।

तौ दंपती गुरो: सायमाश्रमं प्रापतु: शुभम्।।

वैश्वदेवां तसंप्राप्तातिथिसत्कारकृन्मुनिम्।

हुताशनहुतद्रव्य प्रसरळूममाल्या।।

पवित्रयतमात्मस्थान् मुनीनागंतुकानपि।

भो भो भूमिनृतां श्रेष्ठ राज्यकुशलमस्ति ते। [43]

एवं राजानं प्राप्य महर्षिवशिष्ठः स्वागतं चकार। अरुन्धती च सुदक्षिणायाः सत्कारं नियमेन कृतवती। वशिष्ठस्य मनसि प्रश्नः आयाति यद् दिलीपः अत्र तपस्तप्तं समागतः। तस्मात् अनेके प्रश्नाः तेन कृताः। दिलीपः वशिष्ठस्य मनोभावं उररीकृत्य प्रश्नानां उत्तरं अनुशासनं संस्थाप्य ददौ। नाहं तपस्तप्तं समागतोऽस्मि। मम राज्यस्योत्तराधिकारी नास्ति। सन्ततिहीनो अस्मि सर्वदा। किं करोमि क्व यामि इति बहुधा चिन्तयामि। मम वंशस्य प्रजायाश्च किं भविष्यति। प्रजानां रक्षणं कः विधास्यति इति भावं मनसि संस्थाप्य दिलीपो वशिष्ठं प्रत्युवाच -

ब्रह्मन्नाहं तपः कर्तुमागतस्तावकाश्रमे।

स्वर्गकामनयात्यक्त्वा राज्यमत्रतथाविधम्।।

ब्रह्मन् सत्यमिदं चोक्तं भवतायतपोवनम्।।

राज्यमारोप्यपुत्रेषु प्राप्ता इक्ष्वाकुवंशजाः।।

नतैस्त्यक्त महीराज्यमिदं स्वर्गगतैरपि।

तन्मूर्तिरस्यां विमनातिष्ठति ह्येवसंततिः।।

यथा बाल्यं गतं तात यौवनं च समागतम्।

यास्यत्यदोपि च तथाजराप्येष्यति निश्चितम्।।

जरसोनंतरंमृत्युः पुरुषस्य न संशयः।

मृत्युंगतेमयि ब्रह्मन् विनातनय संभवम्।।

कस्येदं जगतीराज्यं भविष्यति गुरोवद।

तस्मादपत्यहीनस्य राज्येपिममतिष्ठतः।।

ममत्वं विद्यते नात्र पुरस्तात्तद्भावतः।

वर्गत्रयस्यवैसम्यक् संवेत्तात्वं गुरोमम्।।

केन दोषेण मे पुत्रो जायते नतपोनिधे।

ध्यानेन दोषमालोक्य तं गुरो कथयाशुभे।

तस्य प्रतिक्रियां कुर्यां श्रुत्वासंतानलब्धये।।

देवल उवाच -

इत्याकर्ण्य वसिष्ठस्तु वचस्तस्य महीपतेः।

उवाच संततिस्तंभ हेतुं वीक्ष्य समाधिना।।

त्व पुराराजशार्दूल संसेव्यसुरनायकम्।

स्नातामिमांवधू स्मृत्वा चलितोनिजमंदिरम्।।

गच्छतस्त्वरयातात संतानोत्कंठितस्यते।

आसीत्सुरतरोर्मूले कामधेनु: स्थितापथि।।

उत्पादितात्वयातस्या पूजांघ्रिरजसोतिरुत्।

प्रदक्षिणनमस्कार सदाचारमकुर्वता।

साशपत्त्वामतिक्रोधात्पुत्रानोत्पत्स्यते तव।।

मम संतानशुश्रूषां यावत्त्वं न करिष्यसि।

गच्छंस्त्वमृतुदानाय त्वरया सुत कामुकः।।

तन्मनानाश्रुणो: शापं नयंताक्षनिनादतः।

तस्या: सुतासुतां धेनुं नंदिनीं ससुतां मम।।

आराधयानयावध्वा सार्द्धं सा दास्यते सुतम्।

इत्युक्तवति तत्र|वसिष्ठे सा तु नंदिनी।।

तपोवनात् समायातावत्सस्नेहस्नुतस्तनी।

तां दृष्ट्वा दृष्टद्धदयो वसिष्ठोमुनि पुंगवः।।

उवाचभूपतिं भूयो दर्शयित्वा च नंदिनीम्।

राजन् समागताह्येषा स्मृतमात्रशुभाह्वया।

अतो विद्धिसमीपस्थां कार्यसिद्धिर्महात्म्न:।।

आराधितानुगत्येयं त्वयारण्ये तथाश्रमे।

वध्वाप्रसादात्तेपुत्रं दास्यते नात्र संशयः।।

यथानाभिभवेदेनां जंतुः कश्चिद्वनोद्भवः।

तथा चारयराजेन्द्रवनेहिंस्रोधनुर्द्धर।।

तथेति लघुवादिने -

अथोषसिनराधीश: पूजितां कुसुमादिभि:।

महिष्यानंदिनीं धेनुं नीत्वारण्यं जगामसः।

गच्छंतीमनुतां देवीं छायेवनृपतिर्ययौ।।

खादंती मनुशष्पादिसोऽपिमूलाद्यभक्षयत्।

तरुच्छायामुपासीनामनुसोप्युपविष्टवान्।।

पिबंतीमनुपानयं राजापिसलिलं पपौ।

स च राजामृदुग्रासैर्दशपनयनेन च।।

कंडूयनैः कामधेनुं गुरोरेवमसेवत।

अथ प्रत्याश्रमं सायंन्यवर्तत महीपतेः।।

अंगं पवित्रयंतीसाखुरोधूतै: रज: कणैः।

अद्योभारेणगुरुणागच्छंतीमंथरं बभौ।।

महीपालमहत्कार्यभाराक्रांतेवनंदिनी।

तांमुनेराश्रमाभ्याशेराज्ञीप्रत्युज्जगामह।

चंदनाक्षत नैवेद्य धूपादीनुपनीय च।।

तां पूजयित्वा विधिवत् प्रणम्य च पुन: पुन:।

कृत्वा प्रदक्षिणं राज्ञी तस्थौ प्रांजलिरग्रत:।।

सा गृहीत्वा चतां पूजां विहितां श्रद्धयातथा।

राज्ञानिश्चलमास्थाय ययौताभ्यां सहाश्रमम्।।

आराधयति तामेवं दिलीपे तु दृढव्रते।।

एकाधिकाव्यतीयायदिनानां वैश्यविंशतिः।

अथ भूमिपतेस्तस्य भावजिज्ञासया तु सा।

विवेशनिर्भयस्वांताशष्पांहि मवद्गृहाम्।।

पश्यताहिमवत्सानुशोभामथमहीभृता।

अलक्षितागम: सिंहोबलाज्जग्राहनं दिनीम्।।

साचक्रंदभृशं धेनुदुःखितेवदयास्वना।

चित्तेधनुर्भृतस्तस्यजनयंती दयोदयम्।।

तदानंदतिमार्कण्यतस्या: सजगतीपतिः।

हिमवत् सानुसंलग्नां निजदृष्टिन्यवर्तत।।

उपर्युपरितां धेनुं श्रवदश्रुमुखीं नृपः।

तीक्ष्णद्रष्ट्रनखं सिहं दृष्ट्वा स व्यधितोऽभवत्।।

गृहीतां तेन सिंहेन तामालक्ष्यधनुर्द्धरः।।

निषंगाद्वाणमुद्धर्तुं प्राहिणोद्दक्षिणं भुजम्।।

बाणमुद्धृत्य तू णीरान्निहंतुं तं मृगाधिपम्।

गुणेनापूर्यमायोज्यचकर्षवसुधाधिप:।।

जडीभूत: समस्तांगस्तत्सिंहावलोकनेन सः।

नाशकद्वाणमुत्सृष्टुं राजासीत् विस्मितस्तत:।।

तादृशं नृपमालक्ष्यजगाद स मृगाधिपः।

नरवाचाभृशं भूयो विस्मयं प्रापयन्निदम्।।

दिलीपं त्वामहं राजन् जानामिरविवंशजम्।

त्वं च जानीहि मां शभोर्गणंकुंभोदराभिधम्।।

देवदारुरयं यस्तेवर्तते दृष्टगोचरे।

पार्वत्या पुत्रवद्वीरपालित: स्निग्धचित्तया।।

एकदामुष्यवन्येन गजेनाधर्षिताकटम्।

उदपाटिमहाराज वत्म्कलं मृदुलं भृशम्।।

एनं तादृशमालक्ष्यमृदानीकरुणान्विता।

मामत्रस्थापयामास सिंहं कृत्वास्यरक्षणे।।

ममाहचेति सादेवी कुंभोदरनिशाम्यताम्।

योत्रजंतु: समागच्छेत्तं खादेस्त्वं वसन्निह।।

तत: प्रभृति राजेन्द्र तदाज्ञां पालयन्नहम्।

पालितां त्रिदशै: सर्वै: कंदरेत्रवसाम्यहम्।।

जडीभावे स्वदेहस्यत्वया कार्यो न विस्मयः।

महतीशांभवीमाया वर्ततेत्रहिमाचले।।

अन्यस्मिन्निवसिंहेत्वं प्रहर्तुं न मयिक्षमः।

यतोमत्पृष्ठमारुह्य वृषमारोहतिप्रभुः।

निवर्तस्वनिजं देहं रक्षसवीर्यसाधनम्।।

देवेनासादितावीर गौरियं भक्षणाय मे।

राजोवाच -

सर्गस्थिति विसर्गाणां कारणं जगत: शिवम्।

अंबिकां जगदंवां च नमामिमृगराज तौ॥

त्वं च तत्सेवकत्वेनमान्योममृगाधिप।

व्रवीमियदहं वाक्यं श्रुत्वा शाधिकरोमिकिम्॥

वसिष्ठो ब्रह्मण: पुत्रो गुरुनो विदितस्तव।

तस्येयं नंदिनीनामधेनुः सर्वार्थमाधिका॥

संतानोत्पत्तये तेन दत्ता राधयितुं मम।

येयमाराधितासम्यक् दिनानि कितचिन्मया॥

लघुतर्णकमातेयं घृतातेगिरिकंदरे।

शंभुभृत्याद्बलात्त्वतो शक्तामोचयितुं मया॥

अहं तस्यमुनेरग्रे गच्छाम्येनामृते कथम्॥

कामधेनोस्तु दौहित्रीजगत् सेव्यायशस्विनी॥

अनया सदृशीनान्या गौर्ययातोषयामितम्।

तस्माद्विमुच्च गामेनामय्यां कुरुनिजाशनम्॥

ददामि देहमात्मीयमपकीर्तिमलीमसम्।

एवं न धर्महानि: स्यादृषेस्तवतुभोजनम्॥

गवार्थे त्यजत: प्राणान् ममापि गतिरुत्तमा।

एवमाकर्ण्य सिंहेन कृते मौने विशांपते॥

तदेवाङ्खोराजान्यपद्धर्मकोविदः॥

तस्य प्रतीक्षमाणस्य सिंहपातं सुदुःसहम्।

पपातो परिपुष्पाणां वृष्टिर्मुक्तासुरेश्वरैः॥

पुत्रोत्तिष्ठेतिवचनं श्रुत्वाराजास उत्थितः।

जननीमिवतां धेनुं ददर्शनमृगाधिपतम्॥

तं विस्मितमुवाचेदं नंदिनीनृपसत्तमम्।

नन्दिन्युवाच -

माययासिंहरूपिण्यात्वं मयासिपरीक्षितः।

मुनिप्रभावान्मां राजन्गृहीतुं न क्षमोंतकः।।

मनसापिकुतोन्येषां मद्ग्रहेशक्तिरंगिनाम्।

स्वशरीरस्य दानेन त्वंमां रक्षितुमुद्यतः।।

अतस्तेहं प्रसन्नास्मिवृणीष्ववरमीप्सितम्।

न गुप्तं देहिनामंतर्वर्तिवृतं भवादृशाम्।।

अतोजननिजानासि वांछितं मम देहि तत्।

मगधेशसुतायां मे वंशकर्तारमात्मजम्।

प्रयच्छकिञ्चित्स्वच्छानां ना साध्यं हिमवादृशाम्।।

नन्दिन्युवाच -

पुत्रपत्रपुटेदुग्ध्वा पयोममपिबेप्सितम्।

आश्रमेगुरुणाज्ञप्त: पुनः पास्यसिशेषितम्।।

भवितावंशकर्ताते सुत: शस्त्रास्त्रतत्ववित्।

मातस्तवैवपास्यामिशेषं सर्वक्रियाविधेः।।

तृप्तोहं मातरासाद्यमिष्टं ते वचनामृतम्।

नान्यदिच्छामिसारंग: कादंम्बिन्या यथाजलम्।

तवशुश्रूषणान्मातरभवं सकलोद्भवः।

समस्तजनपूज्यायाविद्याया इव मूढधी:।

तवमातामहीदत: शापोप्यासीद्वरोमम।

तमृतेपुत्रलाभो मे कुतस्तव च दर्शनम्।।

वरायैवतथाप्यंवसमाराध्या भवादृशः।

न हि कश्चिद्विषाकांक्षी महादेवात्रिवर्गदात्।

श्रुत्वेतितद्वच: सा गौः प्रसन्ना साधुसाध्विति।

आभाष्याहिमादपी ययौ तेन सहाश्रमम्।।

पुर्वेद्युरिवतत्रापि पूसिता राजभार्यया।

प्रसन्ना सा बभौ धेनु: धेनु: कार्यसिद्धिरिवांगभाक्।

दिलीप: नन्दिनीं पूजयित्वा वरं प्राप।

स्वल्पेनैव कालेन स्वपाणिगृहीतभार्यायां सुदक्षिण्यां नन्दिन्या: कृपाप्रसादात् गुरोरनुग्रहाच्च पुत्ररत्नं प्राप्तवान्। स पुत्र: रघुनामधेय: वंशस्य संपूर्णस्य प्रतिष्ठां ववर्ध। किं बहुना रघुवंशस्य विस्तार: सुदीर्घकालं यावत् श्रुयते। अस्या: कथाया: फलमपि तत्रैव कतिपयै: श्लोकै: भणितम् यथा -

य: पठिष्यति भूपस्य दिलीपस्य कथामिमाम्।

धनं धान्यं सुतं वैश्यं लप्स्यते सपुमानिह॥

शरभवरसुताप्तयेस्वबुद्ध्यासममनयापरितोषयाशुगौरीम्।[44]

त्वमपि कुलधरं गुणान्वितं सासुतमनवंखलुदास्यते च तुभ्यम्॥

एवं प्रकारण पद्मपुराणे कथाविस्तारेण गवां पूजन विधि प्रदर्शयामासा पुराणस्य प्रसंग: सदा कयामाध्यमेन प्रचलति विशिष्य उत्तमोत्तम फललाभाय सर्वत्र एषा पद्धति: प्रकल्पिता।

सम्पूर्णस्य पद्मपुराणस्य सूक्ष्मेनिकया दिग्दर्शनमकारि। तत्र तत्र सन्दर्भाणां य: क्रम: प्राप्त: तेनैव क्रमेण प्रबन्धेऽस्मिन् विनियोजित: अग्रेऽपि क्वचित् श्राद्धदानविमर्शप्रकरणे गोदानस्य महत्त्वं प्रत्यपादि। किं बहुना पद्मपुराणे भारतीयसंस्कृते: प्रायेण सर्वे पक्षा: याथातथ्येन वर्णिता:। यथा एकादशीव्रतप्रसंगे द्वादशमासानां एकादशीव्रतं विस्तरेण कथितम्। तत्रैव गोदानस्य च क्वचित् संक्षेपेण - चर्चा प्राप्यते। पुराणमिदं पठनपाठनयोग्यं प्रतिभाति यत्र सर्वे समाजोपकारिणो विपया: निर्दिष्यः। इदानीं पुराणं प्रणम्य आदिकाव्यस्य अन्वेषणं करोमि।

सन्दर्भग्रन्थाः -


1. छान्दोग्योपनिषद्
2. श्रीमद्भागवतम् - 1.4.20
3. बृहद्धर्मोपपुराणम् - 1.25.33
4. नारदपुराणम् -2.14.17
5. स्कन्दपुराणम् - 1.22-23
6. वायुपुराणम् - 1.200
7. पद्मपुराणम् - 1.45
8. मत्स्यपुराणम् - 53.70
9. श्रीमद्देवीभागवतम् - 1.3.24
10. तत्रैव
11. स्कन्दपुराणं रेवाखण्डे - 1.13

12. मत्स्यपुराणम् - 247.5

13. ब्रह्माण्डपुराणम् - 1.10

14. छान्दोग्योपनिषद् - 7.1.2

15. गोपथब्राह्मणम् - 1.21

16. कण्डिका

17. वायुपुराणम् पूर्वार्द्ध - 8.170-180

18. वायुपुराणम् उत्तरार्द्ध- 1.149

19. वायुपुराणे तत्रैव।

20. वायुपुराणम् - 8.301-302

21. वायुपुराणम् - 16.16

22. वायुपुराणम् - उत्तरार्द्ध 18 - अध्यायात्

23. वायुपुराणम् - उत्तरार्द्ध - 19.2-5

24. वायुपुराणम् - उत्तरार्द्ध - 19.7

25. वायुपुराणम् - उत्तरार्द्ध - 19.89

26. वायुपुराणम् - तत्रैव

27. तत्रैव

28. तत्रैव

29. पद्मपुराणम् - 1.1.45

30. पद्मपुराणम् - 5.109.1

31. पद्मपुराणम् - 5.115.45

32. पद्मपुराणम् - तत्रैव

33. पद्मपुराणम् - 3.61.59

34. तत्रैव

35. तत्रैव

36. पद्मपुराणम् - 3.1.26

37. पदम्पुराणम् - 1.1.54-55

38. पद्मपुराणम् - स्वर्गखण्डं 1-22-23

39. पद्मपुराणम् - पातालखण्डम् - 30-9-10

40. पद्मपुराणम् - तत्रैव

41. पद्मपुराणम् - तत्रैव

42. पद्मपुराणम् - तत्रैव अग्ने

43. पद्मपुराणम् उत्तरखण्डम् - 202 अध्यात्

44. पद्मपुराणम् - तत्रैव